श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीपराङ्कुश यतीन्द्र महादेशिकैरनुगृहीता

# ॥ श्री लक्ष्मीनृसिंहप्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनृसिंहप्रपत्तिः ॥

श्री श्रीनिवासाह्वय योगिवर्यं
नारायणं योगिवरं तथैव।
श्री योगिवर्य रघुवीर वेद -
कोटीरसंज्ञं गुरुमाश्रयामि ॥ 1 ॥

अहोबिले गारुडशैलमध्ये
कृपावशात् कल्पित सन्निधानम्।
लक्ष्म्या समालिङ्गित वामभागं
लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 2 ॥

श्रीवण् शठाराति यतीन्द्रमाद्यं
प्रेम्णा स्वयं प्रेषमनुं प्रदाय।
स्वाराधने प्रेरयति स्म यस्तं
लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 3 ॥

सर्वस्य लोकस्य समीहितानां
प्रदान दीक्षा वशतस्सदैव।
श्रिया समेतं श्रितदोषहन्त्र्या
लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 4 ॥

यस्याभवत् भक्तजनार्तिहन्तुः
पितृत्वमन्येष्वविचार्य तूर्णम्।
स्तम्भेवतारस्तमनन्यलभ्यं
लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 5 ॥

यमीक्षितुं देवगणोऽतिरुष्टं
शत्रौ न शक्नोति चतुर्मुखादिः।
प्रसादितो भक्तजनेन यस्तं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **6** ॥

वामत्वमद्य त्यज संश्रितेषु
नास्तीह कश्चित्किल नापराधी।
लक्ष्म्येति वामाङ्कगयोच्यमानं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **7** ॥

श्री वीरवद्राघव वेदमौळिं
योगीन्द्रक्लृप्तैश्शुभतापपुण्ड्रैः।
नामादिभिर्मा युतमातनोद्य -
स्तं श्रीनृसिंहं शरणं प्रपद्ये॥ **8** ॥

श्रीमद्रहस्यत्रयसारपाठ -
प्रारंभकाले तव सर्वसिद्धिः।
स्यादित्युपश्रुत्यभिधायकं मे
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **9** ॥

भाष्यप्रदानावसरे तु वीर -
रघूद्वहाम्नायशिखार्य रूपी।
स्वप्नागतो भाष्यमदत्त यो मे
तं श्रीनृसिंहं शरणं प्रपद्ये॥ **10** ॥

यच्छ्रीनिवासाख्य मुनीन्द्रतो मां
संप्राप्त वेदान्तयुगं व्यतानीत्।
तदर्पितं स्वीकृतमद्धरं तं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **11** ॥

स्वप्ने रमावासमुनीन्द्ररूपी
स्वयं समागत्य ममापि देवः।
त्रिदण्डकाषायमदान्मुदा य -
स्तं श्रीनृसिंहं शरणं प्रपद्ये॥ **12**॥

आराधनं स्वस्य कथं मयेति
भीतं सदा पद्मलता मुखेन।
आश्वास्य मामप्यकरोत् कृतार्थं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **13**॥

शठारिनारायणयोगिवर्य -
पराङ्कुशस्वामि पराङ्कुशाद्यैः।
यः पूजितः श्रीनिधियोगिमुख्यैः
तं श्रीनृसिंहं शरणं प्रपद्ये॥ **14**॥

नारायण श्रीरघुवीर वेद -
कोटीर नारायण मानिवासैः।
योगीश्वरै रन्वह मर्चितो य -
स्तं श्रीनृसिंहं शरणं प्रपद्ये॥ **15**॥

त्वद्भक्तवाचा तव किङ्करेण
त्वत्प्रीतिकामेन मया कृतेन।
स्तोत्रेण लक्ष्मीनृहरेः स विष्णुः
प्रीतो भव त्वं करुणार्द्रदृष्टिः॥ **16**॥

पराङ्कुशाख्येन तपोधनेन
भक्त्या नृसिंहस्य कृता प्रपत्तिः।
पापठ्यते येन भवेत् स तस्य
पूर्णं कृपापूर्णकटाक्षपात्रम्॥ **17**॥

॥ इति श्री लक्ष्मीनृसिंहप्रपत्तिः समाप्ता ॥